kenopaniṣad

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपषिदम् । माहं ब्रह्म निराकुर्याम् । मा मा ब्रह्म निराकरोत् । अनिराकरणमस्त्वनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु । ते मयि सन्तु । ॐ शान्तिः शान्तिः शान्तिः ॥

Om āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrotramatho balamindriyāṇi ca sarvāṇi | sarvaṁ brahmaupaniṣadam | māhaṁ brahma nirākuryām | mā mā brahma nirākarot | anirā karaṇam astvanirākaraṇaṁ me astu | tadātmani nirate ya upaniṣatsu dharmāste mayi santu | te mayi santu |

om śāntiḥ śāntiḥ śāntiḥ ||

Part One

ॐ केनेषितं पतति प्रेषितं मनः
　　केन प्राणः प्रथमः प्रैति युक्तः ।
केनेषितां वाचमिमां वदन्ति
　　चक्षुः श्रोत्रं क उ देवो युनक्ति ॥ १ ॥

om keneṣitaṁ patati preṣitaṁ manaḥ
　　kena prāṇaḥ prathamaḥ praiti yuktaḥ |
keneṣitāṁ vācamimāṁ vadanti
　　cakṣuḥ śrotraṁ ka u devo yunakti || 1 ||

श्रोत्रस्य श्रोत्रं मनसो मनो यद्

वाचो ह वाचं स उ प्राणस्य प्राणः ।

चक्षुषश्चक्षुरतिमुच्य धीराः

प्रेत्यास्माल्लोकादमृता भवन्ति ॥ १ ।२ ॥

śrotrasya śrotraṁ manaso mano yad
vāco ha vācaṁ sa u prāṇasya prāṇaḥ |
cakṣuṣaścakṣuratimucya dhīrāḥ
pretyāsmāllokādamṛtā bhavanti || 1|2 ||

न तत्र चक्षुर्गच्छति न वाग्गच्छति नो मनः ।

न विद्मो न विजानीमो यथैतदनुशिष्यात् ॥

अन्यदेव तद्विदितादथो अविदितादधि ।

इति शुश्रुम पूर्वेषां ये नस्तद्व्याचचक्षिरे ॥ १ ।३ ॥

na tatra cakṣurgacchati na vāggacchati no manaḥ |
na vidmo na vijānīmo vijānīmo yathaitadanuśiṣyāt ||
anyadeva tadviditādatho aviditādadhi |
itiśuśruma pūrveṣāṁ ye nastadvyācacakṣire || 1|3||

यद्वाचाऽनभ्युदितं येन वागभ्युद्यते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ १ ।४ ॥

yadvācā'nabhyuditaṁ yena vāgabhyudyate |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 1|4 ||

यन्मनसा न मनुते येनाहुर्मनो मतम् ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ १ ।५ ॥

yanmanasā na manute yenāhurmano matam |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 1|5 ||

यच्चक्षुषा न पश्यति येन चक्षूꣳषि पश्यति ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ १।६ ॥

yaccakṣuṣā na paśyati yena cakṣūm̐ṣi paśyati |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 1|6 ||

यच्छ्रोत्रेण न शृणोति येन श्रोत्रमिदं श्रुतम् ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ १।७ ॥

yacchrotreṇa na śṛṇoti yena śrotramidaṁ śrutam |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 1|7||

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।

तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥ १।८ ॥

yatprāṇena na prāṇiti yena prāṇaḥ praṇīyate |
tadeva brahma tvaṁ viddhi nedaṁ yadidamupāsate || 1|8 ||

## Part Two

यदि मन्यसे सुवेदेति दहरमेवापि

  नूनं त्वं वेत्थ ब्रह्मणो रूपम् ।

यदस्य त्वं यदस्य देवेष्वथ नु

  मीमाꣳस्यमेव ते मन्ये विदितम् ॥ २।१ ॥

yadi manyase suvedeti daharamevāpi
  nūnaṁ tvaṁ vettha brahmaṇo rūpam |
yadasya tvaṁ yadasya deveṣvatha nu
  mīmām̐syameva te manye viditam || 2|1 ||

नाहं मन्ये सुवेदेति नो न वेदेति वेद च ।

यो नस्तद्वेद तद्वेद नो न वेदेति वेद च ॥ २।२॥

nāhaṁ manye suvedeti no na vedeti veda ca |
you nastadveda tadveda no na vedeti veda ca || 2|2 ||

यस्यामतं तस्य मतं मतं यस्य न वेद सः ।

अविज्ञातं विजानतां विज्ञातमविजानताम् ॥ २।३॥

yasyāmataṁ tasya mataṁ mataṁ yasya na veda saḥ |
avijñātaṁ vijānatāṁ vijñātamavijānatām || 2|3 ||

प्रतिबोधविदितं मतं मतममृतत्वं हि विन्दते ।

आत्मना विन्दते वीर्यं विद्यया विन्दतेऽमृतम्॥ २।४॥

pratibodhaviditaṁ mataṁ matamamṛtatvaṁ hi vindate |
ātmanā vindate vīryaṁ vidyayā vindate'mṛtam || 2|4 ||

इह चेदवेदीदथ सत्यमस्ति

न चेदिहावेदीन्महती विनष्टिः ।

भूतेषु भूतेषु विचित्य धीराः

प्रेत्यास्माल्लोकादमृता भवन्ति ॥ २।५॥

iha cedavedīdatha satyamasti
na cedihāvedīnmahatī vinaṣṭiḥ |
bhūteṣu bhūteṣu vicitya dhīrāḥ
pretyāsmāllokādamṛtā bhavanti || 2|5 ||

Part Three

ब्रह्म ह देवेभ्यो विजिग्ये तस्य ह ब्रह्मणो विजये देवा अमहीयन्ते ॥ ३।१॥

brahma ha devebhyo vijigye tasya ha brahmaṇo vijaye devā amahīyante || 3|1 ||

त ऐक्षन्तास्माकमेवायं विजयोऽस्माकमेवायं महिमेति । तद्धैषां विजज्ञौ तेभ्यो ह प्रादुर्बभूव तन्न व्यजानत किमिदं यक्षमिति ॥ ३।२॥

ta aikṣantāsmākamevāyaṁ vijayo'smākamevāyaṁ mahimeti | taddhaiṣāṁ vijajñau tebhyo ha prādurbabhūva tanna vyajānata kimidaṁ yakṣamiti || 3|2 ||

तेऽग्निमब्रुवञ्जातवेद एतद्विजानीहि किमिदं यक्षमिति तथेति ॥ ३।३॥

te'gnimabruvañjātaveda etadvijānīhi kimidaṁ yakṣamiti tatheti || 3|3 ||

तदभ्यद्रवत्तमभ्यवदत्कोऽसीत्यग्निर्वा अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ॥ ३।४॥

tadabhyadravattamabhyavadatko'asītyagnirvā ahamasmītyabravījjātavedā vā ahamasmīti || 3|4 ||

तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वं दहेयं यदिदं पृथिव्यामिति ॥ ३।५॥

tasmim̐stvayi kiṁ vīryamityapīdam̐ sarvaṁ daheyaṁ yadidaṁ pṛthivyāmiti || 3|5 ||

तस्मै तृणं निदधावेतद्दहेति । तदुपप्रेयाय सर्वजवेन तन्न शशाक दग्धुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ ३।६॥

tasmai tṛṇaṁ nidadhāvetaddaheti | tadupapreyāya sarvajavena tanna śaśāka dagdhuṁ sa tata eva nivavṛte naitadaśakaṁ vijñātuṁ yadetadyakṣamiti || 3|6 ||

अथ वायुमब्रुवन्वायवेतद्विजानीहि किमेतद्यक्षमिति तथेति ॥ ३।७॥

atha vāyumabruvanvāyavetadvijānīhi kimetadyakṣamiti tatheti || 3|7||

तदभ्यद्रवत्तमभ्यवदत्कोऽसीति वायुर्वा अहमस्मीत्यब्रवीन्मातरिश्वा वा अहमस्मीति ॥ ३।८ ॥

tadabhyadravattamabhyavadatko'sīti vāyurvā ahamasmītyabravīnmātariśvā vā ahamasmīti || 3|8 ||

तस्मिꣳस्त्वयि किं वीर्यमित्यपीदꣳ सर्वमाददीय यदिदं पृथिव्यामिति ॥ ३।९॥

tasmim̐stvayi kiṁ vīryamityapīdam̐ sarvamādadīya yadidaṁ pṛthivyāmiti || 3|9 ||

तस्मै तृणं निदधावेतदादत्स्वेति तदुपप्रेयाय सर्वजवेन तन्न शशाकादातुं स तत एव निववृते नैतदशकं विज्ञातुं यदेतद्यक्षमिति ॥ ३।१० ॥

tasmai tṛṇaṁ nidadhāvetadādatsveti tadupapreyāya sarvajavena tanna śaśākādātuṁ sa tata eva nivavṛte naitadaśakaṁ vijñātuṁ yadetadyakṣamiti || 3|10 ||

अथेन्द्रमब्रुवन्मघवन्नेतद्विजानीहि किमेतद्यक्षमिति तथेति तदभ्यद्रवत्तस्मात्तिरोदधे ॥ ३।११ ॥

athendramabruvanmaghavannetadvijānīhi kimetadyakṣamiti tatheti tadabhyadravattasmāttirodadhe || 3|11 ||

स तस्मिन्नेवाकाशे स्त्रियमाजगाम बहुशोभमानामुमाꣳ हैमवतीं ताꣳहोवाच किमेतद्यक्षमिति ॥ ३।१२ ॥

sa tasminnevākāśe striyamājagāma bahuśobhamānāmumām̐ haimavatīṁ tām̐hovāca kimetadyakṣamiti || 3|12 ||

## Part Four

सा ब्रह्मेति होवाच ब्रह्मणो वा एतद्विजये महीयध्वमिति ततो हैव विदाञ्चकार ब्रह्मेति ॥ ४।१ ॥

sā brahmeti hovāca brahmaṇo vā etadvijaye mahīyadhvamiti tato haiva vidāñcakāra brahmeti || 4|1 ||

तस्माद्वा एते देवा अतितरामिवान्यान्देवान्यदग्निर्वायुरिन्द्रस्ते ह्येनन्नेदिष्ठं पस्पर्शुस्ते ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ ४।२॥

tasmādvā ete devā atitarāmivānyāndevānyadagnirvāyurindraste hyenannediṣṭhaṁ pasparśuste hyenatprathamo vidāñcakāra brahmeti || 4|2||

तस्माद्वा इन्द्रोऽतितरामिवान्यान्देवान्स ह्येनन्नेदिष्ठं पस्पर्श स ह्येनत्प्रथमो विदाञ्चकार ब्रह्मेति ॥ ४।३॥

tasmādvā indro'titarāmivānyāndevānsa hyenannediṣṭhaṁ pasparśa sa hyenatprathamo vidāñcakāra brahmeti || 4|3 ||

तस्यैष आदेशो यदेतद्विद्युतो व्यद्युतदा३ इतीन् न्यमीमिषदा३ इत्यधिदैवतम् ॥ ४।४॥

tasyaiṣa ādeśo yadetadvidyuto vyadyutadā3 itīn nyamīmiṣadā3 ityadhidaivatam || 4|4 ||

अथाध्यात्मं यदेतद्गच्छतीव च मनोऽनेन चैतदुपस्मरत्यभीक्ष्णꣳ सङ्कल्पः ॥ ४।५॥

athādhyātmaṁ yadetadgacchatīva ca mano'nena caitadupasmaratyabhīkṣṇam̐ saṅkalpaḥ || 4|5 ||

तद्ध तद्वनं नाम तद्वनमित्युपासितव्यं स य एतदेवं वेदाभि हैनꣳ सर्वाणि भूतानि संवाञ्छन्ति ॥ ४।६॥

taddha tadvanaṁ nāma tadvanamityupāsitavyaṁ sa ya etadevaṁ vedābhi hainam̐ sarvāṇi bhūtāni saṁvāñchanti || 4|6 ||

उपनिषदं भो ब्रूहीत्युक्ता त उपनिषद्ब्राह्मीं वाव त उपनिषदमब्रूमेति ॥ ४।७॥

upaniṣadaṁ bho brūhītyuktā ta upaniṣadbrāhmīṁ vāva ta upaniṣadamabrūmeti || 4|7 ||

तस्यै तपो दमः कर्मेति प्रतिष्ठा वेदाः सर्वाङ्गानि सत्यमायतनम् ॥ ४ । ८ ॥

tasyai tapo damaḥ karmeti pratiṣṭhā vedāḥ sarvāṅgāni satyamāyatanam || 4| 8 ||

यो वा एतामेवं वेदापहत्य पाप्मानमनन्ते स्वर्गे लोके ज्येये प्रतितिष्ठति प्रतितिष्ठति ॥ ४ ।९ ॥

yo vā etāmevaṁ vedāpahatya pāpmānamanante svarge loke jyeye pratitiṣṭhati pratitiṣṭhati || 4|9 ||

ॐ आप्यायन्तु ममाङ्गानि वाक्प्राणश्चक्षुः श्रोत्रमथो बलमिन्द्रियाणि च सर्वाणि । सर्वं ब्रह्मौपनिषदम् । माहं ब्रह्म निराकुर्याम् । मा मा ब्रह्म निराकरोत् । अनिराकरणमस्त्वनिराकरणं मे अस्तु । तदात्मनि निरते य उपनिषत्सु धर्मास्ते मयि सन्तु । ते मयि सन्तु ।

ॐ शान्तिः शान्तिः शान्तिः ॥

Om āpyāyantu mamāṅgāni vākprāṇaścakṣuḥ śrotramatho balamindriyāṇi ca sarvāṇi | sarvaṁ brahmaupaniṣadam | māhaṁ brahma nirākuryām | mā mā brahma nirākarot | anirākaraṇamastvanirākaraṇaṁ me astu | tadātmani nirate ya upaniṣatsu dharmāste mayi santu | te mayi santu |

om śāntiḥ śāntiḥ śāntiḥ ||

---